श्रान्तः श्रान्तः स पुनरनया लोचनस्याञ्चलेन ॥ २८ ॥

98 गङ्गा । अहो कमनीयता विनिमयस्य ।

99 यमुना । तदो तदो ।

100 हंसः । ततः

प्रत्यासन्ने भवति निलये संप्रयाता पुरस्ता-
त्तूर्णं क्षिप्तैः कतिपयपदैश्चापमादाय हस्तात् ।
श्रान्तं कान्तं नवकिसलयैः सानुजं वीजयन्ती
जाता सीता समुचितविधिप्रक्रियावैजयन्ती ॥ २९

पुनः सकौतुकम् । इदमन्यच्च सरसपेशलं कथयामि ते ।

जनकतनयाहस्तन्यस्तैर्मुहुर्नवपल्लवैः
शिशिरमसृणस्तत्कालं यः समेति समीरणः ।
प्रशममममुना खेदोद्भूतं जगाम कपोलयोः
सलिलमनयोः शोकोद्भूतं शशाम न नेत्रयोः ॥ ३० ॥

अपि च ।

---

99 ततस्ततः ।

---

97. D. F. पीत for वीत. A. लव for कण.

98. D. om. गङ्गा. A. विनयस्य.

100. A. क्षिप्रैः for क्षिप्तैः & किमि-ति before कथयामि. A. E. G. स्वेदोद्भूतम्. D. °परिकरैः, °क्षीतैः & विद्रुत for शिशिर.

कृतः स्थाने स्थाने विहितवरिवस्यापरिकरः
सुमित्रापुत्रेण श्रमशमनशीतो रघुपतिः ।
असावेतेनापि क्षणविरहबाष्पाञ्चितदृशा
कृतालोकश्चक्रे गलितसकलायासशिशिरः ॥ ३१ ॥

101 सरयूः । कियतां पुनरह्नां परिवर्तेन रघुराष्ट्रमतिक्रान्तं वत्सेन ।

102 हंसः । अयि कथमजानती वर्तसे रघूणामाधिपत्यम् ।

एते हि स्वशरावनम्रनिखिलक्ष्मापालमौलिज्वल-
न्माणिक्यस्फुरदंशुमांसलपदप्रेङ्खन्नखज्योतिषः ।
दूरोन्मुक्तचतुःसमुद्रलहरीविक्षिप्तशुक्तिस्खल-
न्मुक्तापङ्क्तिविनिर्मितैकवलयं भूमण्डलं भुञ्जते ॥ ३२ ॥

उत्तरकोसलास्तु त्रिचतुरैरेवाहोभिरतिक्रान्ताः । अथ पुरमथनमौलिमालतीमालां मन्दाकिनीमतीत्य कलिन्दगिरिकरिकपोलमदवारिधारां कालिन्दीमप्यतिक्रान्ताः ।

103 गङ्गा । यमुनां प्रति । सखि तदिदं यत्कथितवत्यासि ।

104 सरयूः ।

तपनसुतया देव्या यद्वा भगीरथकन्यया
विपुलविपुलैर्वीचीहस्तैश्चिरादपि किं कृतम् ।

---

101. A. गङ्गा. for सरयूः. D. रघुराज्यम्.

102. B. कथय before कथम्. A. अजानन्ती. D. वर्तते. A. आधिपत्ये. A. B. D. G. रस for शर. D. हारोन्मुग्ध for दूरोन्मुक्त. A. मुक्ति for शुक्ति. A. B. D. G. °कोशलाः. B. D. G. om. तु. B. C. E. F. चतुर्भिः. A. B. om. एव. D. अभिक्रान्ताः. A. om. अथ पुर ... अतिक्रान्ताः.

103. D. om. यमुनां प्रति । सखि.

104. G. om. सरयूः. D. यद्वा देव्या. B. यद्भागीरथ°. A. B. C. E. F. चपलविपुलैः. C. D. E. F. लग्नैः for भङ्गैः. A. सखी for सती. A. B. यैः for यत्.

ललितलवलीभङ्गैरङ्गैर्वनं चलिता सती
जनकतनया पाणौ धृत्वा न यद्विनिवारिता ॥ ३१ ॥

105 गङ्गा। विहस्य। सखि कथं परोक्ष इव समक्षेऽपि नितान्तमुपालभसे।

106 यमुना। तदो तदो।

107 हंसः। ततः शबरशरदलितविन्ध्यकरिकुम्भतटीविमुक्तमुक्ताफलप्रकरकोरकिततीरलतावितानपरिच्छदां शर्मदां नर्मदामतीत्याचिरेण चपलकर्णाञ्चलपरिमिलितमदकरिकपोलचलितसहचरसमागममुदितमधुकरवधूमधुररसकुसुमकेसरं गोदावरीपरिसरं प्रयाताः।

108 यमुना। हद्धि हद्धि। तत्थ हि लङ्केसरबहिणीत्तणेण मत्ता सुप्पणहा णाम रक्खसी परिब्भमइ।

109 हंसः। अतिमत्तेति वक्तव्यम्। सा हि सौमित्रिशरदलितनिजनासिकारुधिरसीधुरसमास्वादितवती।

---

106 ततस्ततः।

108 हा धिक् हा धिक्। तत्र हि लङ्केश्वरभगिनीत्वेन मत्ता शूर्पणखा नाम राक्षसी परिभ्रमति।

---

105. D. om. विहस्य & कथम्. A. परोक्षवत्प्रत्यक्षे. All except C. E. उपालम्भसे.

107. A. om. हंसः. A. B. G. ततश्च. D. ललित after दलित. A. मुक्त. A. D. G. तारकित for कोरकित. D. om. °तीर ... चलित°. C. E. F. वन for वितान. A. C. E. F. om. शर्मदाम्. B. समागमागम. D. om. मधुर. C. E. F. D. स्वरस & G. सरस after मधुर. B. G. om. रस. D. °केसर. A. B. तीरम् for परिसरम्.

108. D. om. one हद्धि. C. E. F. om. हि. B. लङ्केस A. °त्तेण & B. G. क्खणेण in place of °त्तणेण. D. G. पमत्ता.

109. G. °पमत्ता. A. B. शस्त्र for शर. B. °रसं समा° C. E. F. सीधूसीकरम्.

110 गङ्गा। सातङ्कं तदाकर्ण्य। किं प्रतिपन्नं जनस्थानवासिना निशाचरचक्रेण।

111 हंसः। करकलितकरालकुन्तकरवालकार्मुकेण निशाचरचक्रेण रामं प्रति प्रचलितम्।

112 गङ्गा। ततस्ततः।

113 हंसः। ततश्चेदं विज्ञप्तः सौमित्रिणा रामभद्रः। आर्य अयं मे

नक्तंचरेन्द्रभगिनीसुकुमारनासा-
निर्मुक्तरक्तलवलिप्तशितैकधारः।
उत्कण्ठते कठिनराक्षसकण्ठजानां
पानाय कर्दमसृजामसृजां कृपाणः ॥ २४ ॥

इदमुक्तं च रामभद्रेण। वत्स अस्त्येतत्। किंतु प्रकृतिभीरुः खल्वबलाजनः। तेनहि जानकीसनाथगर्भां पर्णशालामेव समुत्खातकरवालः पालयतु भवान्। अमहमचिरादित्यर्धोक्त एव निशाचरचक्रं प्रति प्रचलितः संमीलितश्च।

114 गङ्गा। सत्रासम्। अनन्तरं किं वृत्तम्।

115 हंसः।

अथाहूतस्ताडकसमरजयसंरम्भरभस-

---

110. C. E. F. समाकर्ण्य. D. सत्समाकर्ण्य. B. जनस्थाननिवासिभिः किं प्रतिपन्नं निशाचरैः. D. प्रसन्नम् for प्रतिपन्नम्. A. निवासिना.

111. A. B. करवालकुन्त. B. रामं प्रति प्रचलितं निशाचरचक्रेण. A. om. निशा...चक्रेण. A. रामभद्रम् & चलितम्.

112. B. om. one ततः.

113. C. om. हंसः. A. D. रामचन्द्रः. A. पानीय. A. B. रामचन्द्रेण. D. रामेण. D. om. समुत्खात...वालः. F. अहमहम्. D. om. प्रति. A. चलित.

115. D. तावत् for आहूतः ... B.

प्रसर्पद्गम्भीरध्वनिगरिमगर्जद्दशदिशा ।
मुहूर्तात्सौमित्रिः

116 सरयूः । तत्किं रामेण ।

117 हंसः । नहि नहि ।

118 सरयूः । अयि देवि भागीरथि परित्रायस्व माम् । नूनं निशाचरचक्रेणेति वक्ष्यति ।

119 हंसः ।

विपिनचरनक्तंचरचमू-
वधक्रीडाकिञ्चिन्मुकुलितरुषा रामधनुषा ॥ ३५ ॥

120 सरयूः । दिष्ट्या जीवितास्मि । सेयं प्रथमदर्शिततीव्रातपापीयूषवृष्टिः ।

121 यमुना । तदो तदो ।

122 हंसः । ततः प्रमुदितमुनिजनवदनशतसमुद्गतसाधुवादश्रवणविनोदेन कतिचिदहानि नयन्ति स्म ।

अथाविरासीत्कुरुविन्दलोचनो
द्रुमान्तरे विद्रुमशृङ्गशोभितः ।
विभक्तमुक्तामयचित्रमण्डनो
मनोपहारी हरिणो हिरण्मयः ॥ ३६ ॥

---

121 ततस्ततः ।

°दिशः & G. °दिशम्.

116. C. E. वृत्तम् &. F. निवृत्तम् after किम्.

118. G. त्रायस्व. B. निशाचरेण.

119. D. रुषा for रुषा.

120. D. तीव्रतापा.

122. A. स after ततः. G. omवदन. A. B. G. समुद्गत. A. B. D. कानिचित्. A. बिन्दु for शृङ्ग. C. D. E. F. विमुक्त for विभक्त.

123 गङ्गा। स्वगतम्। नूनमयमनर्थाङ्कुरोद्भेदः। प्रकाशम्। ततस्ततः।

124 हंसः।

भ्रूवल्लीविजितमनोजचारुचाप-
श्चापश्रीजितयुवतीमनोहरभ्रूः।
सीतायास्तमनुससार लोचनान्तः
कान्तश्च स्फुरदसितोत्पलाभिरामः॥ ३७॥

ततः।

त्रासातुरेण हरिणेन सहैव तेन
दूरं प्रयाति हृदये जनकात्मजायाः।
सौमित्रिराश्रमपदाद्धृतचापपाणि-
र्द्राङ्निर्जगाम च विवेश च कोऽपि भिक्षुः॥ ३८॥

125 गङ्गा। ततस्ततः।

126 हंसः। ततश्च।

इतो बाणं रामः क्षिपति हरिणे मुक्तकरुणः
सचापः सौमित्रिः स्वजनमनुयाति द्रुतमितः।
इतः सीताभिक्षामुपनयति भिक्षोः करतले
त्रयं व्योम्नि प्रेङ्खन्युगपदहमालोकयमिदम्॥ ३९॥

127 सरयूः। ततस्ततः।

---

123. D. G. om. उद्भेद.

124. B. ततः & C. E. ततश्च before भ्रूवल्ली°.

A. चापम्. D. G. मनोरमश्रीः. A. तदनु & लोचनान्तम्. A. B. गङ्गा। ततस्ततः। हंसः। after °भिरामः, & om. ततः. B. D. G. कृत for धृत.

126. A. om. ततश्च. G. om. च. B. उपयाति.

128 हंसः । ततः

कनकहरिणगात्रे बाणपातावलोका-
द्विमुखहृदयवृत्तिर्लोचने संनिमील्य ।
कथयितुमयि त्वेदं रामवृत्तान्तजातं
शरयु तव तटान्तं तूर्णमेवावतीर्णः ॥ ४० ॥

तदनुजानीत मां देव्यः सलिलावगाहनाय । श्रान्तोऽस्मि ।

129 तिस्रः ।

चिरमारम रमणीये शुचिपयासि स्मेरनीरजे सरसि ।
पुरतरुणीचरणरणन्मणिनूपुरकूजितोत्कुतुकः ॥ ४१ ॥

130 हंसः । प्रणम्य निष्क्रान्तः ।

131 गङ्गा । सखि सरयु अनेन वृत्तान्तक्रमेण कातरं मे मनः ।

132 सरयूः । भगवति अलं कातरतया । अनेन हि नूपुरोद्देदेन स्मृतं मया यत्किल वनगमनोद्यतां जानकीमिदमुक्तवती करकलितनूपुरद्वया पतिव्रता सीमन्तिनीरत्नमरुन्धती ।

अधिचरणममू चमूरुनेत्रे
मृदुरणितौ मणिनूपुरौ विधेहि ।

---

128. D. om. हंसः. A. B. om. ततः. A. तटवटान्तम्. D. एत्य for एव. C. D. E. F. ततः for तत्.

129. A. B. गङ्गा for तिस्रः. B. D. चिरमात्मनि & G. विहरास्मिन् for चिरमारम. D. वयसि for पयसि, & पयसि for सरसि. A. om. स्मेर...सि & चरण. B. मधुर before कूजित C. मधुजित, D. कूजन, E. मधुररवजित & F. रवजित for कूजित.

130. D. om. हंसः.

131. A. adds इतः सीता before सखि, & reads सरयूः. A. B. हृदयम् for मनः.

132. D. G. om. भगवति. A. B. G. add ननु before अनेन. A. B.

अहरपि विरहं न यन्महिम्ना
हरिणदृशः सह वल्लभैर्लभन्ते ॥ ४२ ॥

कृतवती च तथा जानकी ।

133 गङ्गा । इदानीं किमपि निर्वृतास्मि । सत्यवादिनी हि मे सखी वसिष्ठगृहमेधिनी । तदागच्छ । इमं वृत्तान्तं रघुकुलवत्सलाय सागराय निवेदयाम । इति परिक्रामन्ति ।

134 गङ्गा । सविस्मयम् । प्रवाहवेगातिशयात्तत्क्षणादेव दूरमायाताः स्मः । यदयमदूर एव गोदावरीसहचरः किमपि समालपन्नालोक्यते कल्लोलिनीकान्तः ।

ततः प्रविशति गोदावरीसहचरः सागरः ।

135 सागरः । ततस्ततः ।

136 सरयूः । कथमिहापि किमपि वृत्तान्तशेषः प्रस्तूयते ।

137 यमुना । अवि णाम तं जेव्व हविस्सदि जं किर हंसेण णावगदम् ।

---

137 अपि नाम तदेव भविष्यति यत्किल हंसेन नावगतम् ।

---

om. हि. A. F. om. मया. B. कलकलित. D. सीमन्तिनीनाम्. C. E. सीमन्तिनीसीमन्त. F. °नेत्रि.

133. A. B. जीविता. F. मे हि. G. यत् for तत्. A. G. आगच्छत. A. B. वृत्तान्तमिमम्. B. निवेदयामि. निष्क्रामन्ति.

134. D. सरयूः for गङ्गा. A. काल for वेग. D. जवातिशयः for प्रवाह...शयात्. C. E. क्षणम् for क्षणादेव. D. G. उपयाताः. B. C. E. F. om. सागरः. A. om. किमपि... up to ततस्ततः in 137. D. समापतन्.

135. C. D. om. सागरः for which E. has सरयूः. D. om. one ततः.

136. A. B. गङ्गा for सरयूः. B. om. अपि. A. om. the 2nd अपि. D. वृत्तान्तः. A. प्रसूयते.

137. C. E. भणिस्सदि for हविस्सदि. C. हंसवअणादवगदं. F. हंसेण णावगदं. A. adds ततः प्रविशति गोदावरी after णावगदम् ।

138 गोदा० । ततः

रामोन्मुक्तैकबाणप्रणिहतहृदयः काञ्चनाङ्गः कुरङ्गः
सद्यो मारीचनामाजनि रजनिचरः सांद्ररक्ताक्तवक्षाः ।
भिक्षुः सोऽपि क्षणार्धान्मणिखचितचलत्कुण्डलश्रेणिशोचि-
र्वीचीखेलत्कपोलस्फुरितदशशिराः कुम्भकर्णाग्रजोऽभूत् ॥४३॥

139 गङ्गा । हा हतास्मि । विमृश्य । अथ वास्ति तन्मणिनूपुरद्वयम् ।

140 सागरः । अपि नाम न स्पृष्टा मम वधूटिका निशाचरेण ।

141 गोदा० । न स्पृष्टा ।

142 सागरः । कथमिव ।

143 गोदा० । तथाहि

रजनिचरकराग्रस्पर्शसंपातविघ्नं
रचयितुमनुसूयाहस्तदत्ताङ्गरागात् ।
बहलमनलपुञ्जः पिञ्जरज्योतिरुद्य-
त्कुवलयदलशीतां संवृणोति स्म सीताम् ॥ ४४ ॥

144 सागरः । अहो अत्रिपत्न्यास्तपःप्रभावः ।

---

138. A. B. प्रतिहत. G. क्षणार्धेम्. A. शोभी & D. G. शोभा for शोचिः. A. किञ्चिल्लिखत्. B. वीरः for वीची. D. तुलित for स्फुरित. A. दशाशिरः.

140. A. reads after अपिनाम, अयि न स्पृष्टा मे वधूटिका निशाचरेण. B. G. मम वधूटिका स्पृष्टा निशाचरेण.

142. D. om. सागरः....तथाहि in 143.

143. D. दत्तहस्ताङ्ग.° B. G. °रागाम्. F. पिञ्जरम्. B. द्योतिः for ज्योतिः. A. उद्यन् & रूपम्.

145 गोदा०। ततो वरुणमन्त्रचिन्तनाहूतनूतनबलाहकाश्वलनिचुम्बितपाणिरस्प्रशदेव।

हा राम हा रमण हा जगदेकवीर
हा नाथ हा रघुपते किमुपेक्षसे माम्।
इत्थं विदेहतनयां मुहुरालपन्ती-
मादाय राक्षसपतिर्नभसा जगाम॥ ४५॥

146 सरयूः। अयि भागीरथि कथमस्मद्भागधेयादरुन्धतीवाचोऽपि मृषा भविष्यन्ति।

147 गङ्गा। नहि नहि।

148 सागरः। सविषादम्। ततस्ततः।

149 गोदा०। ततः शैलशिखराधिवासिना विहगराजेन जटायुना पन्थानमवरुध्येदमुक्तो राक्षसेन्द्रः।

आः पापिन् पश्यतो मे रघुतिलकवधूं चोरवृत्त्यापहर्तुं
सीतां शीतांशुलेखामिव गिरिशशिरःशायिनीमुद्यतोऽसि।
एष च्छित्वा शिरांसि प्रखरनखमुखैर्दीप्तचूडामणीनि
त्वामद्याहं गरुत्मानुरगमिव सुधाकाङ्क्षिणं संहरामि॥ ४६॥

150 गङ्गा। स एष नूपुरप्रसादः।

---

145. A. चिन्ता. D. अस्प्राक्षीत्, & श्वशुर for रमण.

146. A. om. कथम् & has अभागधेयम्. D. मिथ्या for मृषा.

147. D. om. one नहि.

148. G. om. one ततः.

149. A. B. °शिखरवासिना. A. D. G. विहङ्ग° C. E. F. जटायुषा. C. E. F. चौर.° D. एतत् for एष, & चूडामणिभिः.

150. D. एव. A. °प्रभावः.

151 सागरः । सहर्षं । ततस्ततः ।

152 गोदा० । ततः

नखैस्तदीयैः कुलिशात्कठोरै
र्भिन्दद्भिरङ्गानि निशाचरस्य ।
रथः स हेमाभरणो बभञ्जे
न जानकीलाभमनोरथोऽस्य ॥ ४७ ॥

153 सागरः । ततस्ततः ।

154 गोदा० । ततश्च निशितनखनिस्त्रिंशनिपातभैरवे समरसंरंभे संभ्रमकातरायां च रावणैककरावस्थितायां जानक्याम् ।

तस्याः क्वणत्किमपि नूपुर एक एव
क्रन्दन्निवातिकरुणं चरणात्पृथिव्याम् ।

155 गङ्गा । हा अधुना निराशाः स्मः ।

156 गोदा० ।

आस्तिष्ठ तिष्ठ निहतोऽसि खलेति जल्पन्
दूराज्जटायुरपि खड्गहतः पपात ॥ ४८ ॥

157 सागरः । हा वत्से नूनमधुना नीतासि निशाचरेण । इति मूर्छति ।

---

151. A. ततश्च ततः.

152. B. D. G. om. ततः. D. बभञ्ज. C. E. F. नो for न. A. B. तु for अस्य.

153. D. सहर्षम् after सागरः. A. G. om. one ततः.

154. C. E. om. च. B. D. शित for निशित. B. नखर. D. G. निर्घात for निपात. A. भरे & D. भैरव for भैरवे. C. E. F. समारम्भे. D. समरसंभ्रम°. B. D. G. om. च after °कातरायाम्. A. D. G. स्थितायाम्.

155. F. सरयूः for गङ्गा. C. D. E. F. om. हा.

156. D. om. गोदावरी.

157. G. adds जानकि after वत्से. D. om. नूनमधुना & has नीता नीतासि. B. मूर्छितः पतति.

158 गङ्गा । उपसृत्यांशुकाञ्चलेन वीजयन्ती । अये रघुकुलवत्सल समाश्वसिहि समाश्वसिहि ।

159 सागरः । समाश्वस्य । कथमिह गङ्गापि ।

160 गङ्गा । यमुनासरय्वौ च ।

161 सागरः । तन्मां मिलिताः सर्वा एवावधारयत । अयमहं हतोऽस्मि शोकस्रोतसा ।

162 गङ्गा । अलमतिकातरतया । यतः

प्रायो दुरन्तपर्यन्ताः सम्पदोऽपि दुरात्मनाम् ।
भवन्ति च सुखोदर्का विपदोऽपि महात्मनाम् ॥ ४९ ॥

163 सरयूः । सखि गोदावरि अपि जानासि नूपुरवृत्तान्तम् ।

164 गोदा० । अथ किम् । कथितं मे वनदेवतया । तमादाय कोऽपि कपिर्ऋष्यमूकसंमुखं गत इति ।

165 सागरः । रामभद्रस्य तु को वृत्तान्तः ।

166 गोदा० । रामभद्रोऽपि सीताविरहविह्वलः सौमित्रिणा धार्यमाणस्तामेव दिशं प्रतस्थे ।

---

158. B. G. अन्तेन for अञ्चलेन. A. अयि.
159. D. G. om. समाश्वस्य.
161. A. D. G om. अव.
162. A. अलमलम्. G. हि for च.
163. D. om. अपि & adds तस्य after जानासि. A. adds. तस्याः after जानासि. C. E. F. नूपुरस्य.
164. All except D. G. om. अथ किम्. F. G. एव for मे. B. ऋष्यमूकं प्रति गतः & om. इति. A. °संमुखगतः.
165. D. om. तु.
166. A. B. D. G. om. अपि. A. adds च after सौमित्रिणा. C. E. F. अवधार्यमाणः.

167 नेपथ्ये । सखि कालिन्दि वर्धसे ।

168 यमुना । का उण इमा सूइसलाआविद्धाइं मह णहाइं अलत्तअरसेण सिञ्चदि ।

169 प्रविश्य तुङ्गभद्रा । जयतु जयतु नदीनाथः ।

170 सागरः । कथं पुनर्वर्धते कालिन्दी ।

171 तुङ्ग० । भ्रातुः सुग्रीवस्य कपिचक्रवर्तिपदलाभेन ।

172 यमुना । दाणिं चन्दणचण्डातपलिम्पन्तपासजुअला वट्टामि ।

173 सागरः । कथं पुनर्वालिपालिता कपिराज्यलक्ष्मीः सुग्रीवमनुसंक्रान्ता ।

174 तुङ्ग० । कथमद्यापि वालिकथा ।

175 सागरः । कथमिव ।

176 तुङ्ग० । ननु नूपुरप्रदानविश्वासिते रामभद्रे आत्मानं सुग्रीवं समर्पयता तथा व्यवसितं हनूमता यथा

---

168 का पुनरियं सूचिशलाकाविद्धानि मम नखान्यलक्तकरसेन सिञ्चति ।

172 इदानीं चन्दनचण्डातपलिप्यमानपार्श्वयुगला वर्ते ।

---

168. D. क for का & णअणाइं for णहाइं. C. D. F. अलत्त.

169. D. om. one जयतु.

170 A. वर्धसे.

171. G. om. कपि. D. °पद-स्थेन.

172. D. °लिप्पन्तप॰. C. वत्तामि for वट्टामि,

173. A. °पालितवानरराजलक्ष्मीः. G. adds अपि after °पालिता. All except G. अनुक्रान्ता.

175. D. om. this speech.

176. D. om. तुङ्गभद्रा. A. om. ननु. B. G. विश्वासितेन रामचन्द्रेण. A. रामचन्द्रे. D. adds च after आत्मानम्. B. G. हनूमता तथा व्यवसि-

सहेलं हत्वैनं हरिणमिव हैमं रघुपतिः
कपीनां साम्राज्ये प्रणतमभिषिञ्चन्नविप्लुतम् ।
अपि ध्वंसाच्छत्रोर्नृपतिमपि चक्रे फलमुना-
मपि प्रीतं चक्रे निजकुलगरिष्ठं दिनकरम् ॥ १० ॥

177 सागरः । ततः किं वृत्तम् ।

178 तुङ्ग० । ततश्च सुग्रीवेणापि

परिम्लानां मालामिव ललितसौरभ्यरहिता-
मपि स्थाने स्थाने विचिनुत वधूटीं दिनमणेः ।
इति स्वेनैवोक्ताः कुमुदनलनीलाङ्गदमुखा
हनूमत्संयुक्ता दिशि दिशि नियुक्ताः कपिभटाः ॥ ११ ॥

179 सागरः । इदानीमुज्जीवितोऽस्मि ।

180 गोदा० । किं भवानेव । नन्वयमिदानीमखिलोऽपि जीवितो जनः ।

181 सागरः । एवमेतत् । सकलजनमनःसाधारणी हि रामचन्द्रमाधुरी । नन्विहैव पश्य

नेदीयसी हि सरयूस्तपनोद्भवेयं
भागीरथीयमुदयः सगरान्ममापि ।

तम्. D. इमम् for एनम्. B. प्लवग for प्रणत. A. साक्षात् for ध्वंसात्. All except B. G. have सख्युः for शत्रोः. C. D. E. F. पल for फल. B. दिनपतिम्. C. E. F. दिनमणिम्.

178. G. om. च. A. B. G. om. अपि. A. सहिता for रहिता. A. B. इतस्ते for इति स्वेन. A. गज for नल.

180. A. B. G. om. अयम्. F. om. अपि. B. जीवलोकः for जीवितो जनः. F. लोकः for जनः.

181. B. om. हि. A. has thus तद्दृस्त...लामीपि यामपि चित्तवृत्तिः &

इत्यन्वयाद्रघुकुले यदि पक्षपात-
स्तद्वत्सला किमपि वामपि चित्तवृत्तिः ॥ १० ॥

सविस्मयमूर्ध्वमवलोक्य।

विलासैर्दम्भोलेर्दलितगरुतः सर्वगिरयः
स चैको मैनाकः पयसि मम मग्नो निवसति।
अये कोऽयं शैलः स्फुरदमितगव्यूतिमहिमा
हिमाद्रिर्विन्ध्यो वा लघुतरगतिर्लङ्घयति माम् ॥ ११ ॥

तदागच्छत। निपरूपयामस्तावत्कोऽयमिति।

इति निष्क्रान्ताः सर्वे।

इति पञ्चमोऽङ्कः।

---

has अच्युत for अमित. D. गर्वोतिम-हिमा. A. अयम् for वा. D. आगच्छ. C. E. F. आगच्छत तम्. B. | C. E. F. om. इति before निष्क्रान्ताः.

॥ षष्ठोऽङ्कः ॥

ततः प्रविशतो रामलक्ष्मणौ ।

1 रामः ।

सौमित्रे ननु सेव्यतां तरुतलं चण्डांशुरुज्जृम्भते

2 लक्ष्मणः ।

चण्डांशोर्निशि का कथा रघुपते चन्द्रोऽयमुन्मीलति ।

3 रामः ।

वत्सैतद्विदितं कथं नु भवता

4 लक्ष्मणः ।

धत्ते कुरङ्गं यतः

5 रामः ।

क्वासि प्रेयसि हा कुरङ्गनयने चन्द्रानने जानकि ॥ १ ॥

पुनर्विलोक्य । हन्त सन्तापेन प्रतारितोऽस्मि । कथमयं गगनतलाधिरोही रोहिणीहृदयनन्दनश्चन्द्रः ।

चन्द्रं प्रति ।

रजनिकर करास्ते बान्धवाः कैरवाणां
सकलभुवनचेष्टाजागरूका जयन्ति ।
कथयसि न कथं तत्कुत्र सा जानकी मे
त्वमपि मृगसहायः किं च नक्तंचरोऽसि ॥ २ ॥

---

5. D. °रोहिणी रोहिणी.° C. E. F. रोहिणीरमणः. A. B. D. G. न कथयसि. G. असि for अपि. B. न & A. D. G. नु for च.

6 लक्ष्मणः । स्वगतम् । अये कथमयमभिषङ्गतरङ्गस्तरलीकरोत्यार्यमानसम् । तदन्यतो नयामि । प्रकाशम् । आर्य अयमितो विलोक्यतां चपलचञ्चुपुटाचान्तशीतकराकिरणशीकरश्चकोरः ।

7 रामः । चकोरं प्रति ।

हंहो विदेहतनयावदनं निवेद्य
भ्रातश्चकोर कुरु मां चरितार्थवृत्तिम् ।
पीता यदीयकमनीयकपोलकान्तिः
कान्तासखेन भवता शशिनं विहाय ॥ ३ ॥

8 लक्ष्मणः । आर्य इयमितो विलोक्यतां शरत्कृशा निशाकरकिरणानुकारतरङ्गा तरङ्गिणी ।

9 रामः । विलोक्य ।

कल्लोलिनि त्वमिव सापि तरङ्गनेत्रा
नूनं कमप्यनुदिनं कृशिमानमेति ।
एतावदस्ति भवतीह निसर्गशीता
सीता पुनर्वहति कामपि तापमुद्राम् ॥ ४ ॥

10 लक्ष्मणः । इतो विलोक्यतामनिद्रनीलनलिननिलीनोऽयमलिनीनाथः ।

---

6. C. om. स्वगतम्. D. G. om. अये. A. om. अयम्. B. अभिषङ्गसङ्गरङ्गः. A. चेतः. C. F. om. प्रकाशम्. C. E. F. om. आर्य & put it before चपल.° B. अव for वि. A. om. कर. B. G. om. किरण.

7. A. B. D. G. तन्मे for हंहो. B. वक्त्रनम् for वदनम्. C. D. E. F. चित्तम् for वृत्तिम्.

8. C. D. E. F. om. आर्य. A. परम् for अयम्. A. निशाकरेण. A. B. °अनुकारा तराङ्गिणी. G. अनुकारितरङ्गा.

9. A. B. अपि for इव. A. B. G. कुरङ्ग for तरङ्ग. C. E. G. किमपि. B. तनिमानम्; & हि for इह.

10. A. अतिशीतल for अनिद्रनील. A. G. नलिनी°. D. वनप्रलीनः. F. प्रलीनः & G. विलीनः for निलीनः.

11 रामः । विलोक्य ।

उन्मीलन्नयनान्तकान्तिलहरीनिष्पीतयोः केवला-
दामोदादवधारणीयवपुषोः कान्तासखेन क्षणम् ।
यत्कर्णोत्पलयोः स्थितेन भवता किंचित्समुद्गुञ्जितम्
भ्रातः षट्पद कुत्र तत्कथय मे कान्तं प्रियाया मुखम् ॥ ५ ॥

12 लक्ष्मणः । सातङ्कम् । अपीमं न विलोकयेदार्यः ।

13 रामः । विलोक्य । अये कोऽयं विहङ्गः

योऽयं बहिः कलितकुङ्कुमरेणुराग-
मन्तस्तु संभृतदयं हृदयं दधानः ।
पारेतरङ्गिणि मुहुः करुणं रटन्ती-
मालोकते सहचरीं न तु संनिधत्ते ॥ ६ ॥

विमृश्य । नूनमयं वल्लभाविरहविदारितहृदयो वराकश्चक्रवाकः ।

14 लक्ष्मणः । धिक् प्रमादः ।

15 रामः । नूनमयमेकः समदुःखतया समानशीलो मे । अथवा कुतोऽस्य मम च समानशीलता ।

अयमुदयति चन्द्रे विप्रयोगं प्रियाया-
श्रयति तपति सूर्ये सङ्गमङ्गीकरोति ।

---

11. G. reads अये कोऽयं विहङ्गः after विलोक्य, & वपुषौ for वपुषोः. B. समुद्गुञ्जितम्. All except A. B. तिष्ठति for षट्पद. F. चित् for तत्. B. मुखं योषितः.]

12. D. om. न. F. विलोकयति.

13. A. om. अये. F. विहङ्गमः. F. रागरेणुम्. A. रामम् for रागम्. A. दारित & C. E. चिरदारित.

14. A. B. G. अहो for धिक्.

15. A. C. E. समान for सम. A. ममास्य. B. मया for मम. A. B.

मम तु जनकपुत्रीविप्रयुक्तस्य यातं
शतमधिकमपीदं चन्द्रसूर्योदयानाम् ॥ ७ ॥

16 लक्ष्मणः । आर्य इह तावन्मुकुलितकमलिनीपरिसरानुसारिणि कलहंसके दीयतां दृष्टिः ।

17 रामः । विलोक्य ।

निजनखशिखालेखालीढस्फुरत्कमलस्तनीं
विरलमधुपश्रेणीगीतां चलः कलहंसकः ।
अकरुणशशिप्रेङ्खत्पादप्रहारविमूर्छिता-
महह नलिनीं क्लान्तां कान्तो मुहुर्मुहुरीक्षते ॥ ८ ॥

विमृश्य । वरमेवंविधानामपि सहचरीजनानुकम्पाकोमलं चेतो न तु निसर्गकठिनस्य रामस्य ।

18 लक्ष्मणः । स्वगतम् । कथमिदानीमप्यस्य चेतसि जानकीमयमिन्द्रजालमुन्मीलति ।

19 नेपथ्ये । सखे रत्नशेखर चिराद्दृश्यसे ।

20 लक्ष्मणः । आकर्ण्य । किमेतत् ।

21 पुनर्नेपथ्ये । वयस्य चम्पकापीड एवमेतत् । मया ह्ययन्तं समयमखिलमायानिधर्मयनाम्नो दानवस्य पुत्रीं निजसहोदरीं मन्दो-

---

om. स्य. C. D. E. F. जातम् for यातम्.

16. B. om. आर्य. D. F. G. कलहंस.

17. B. चलत् & A. G. चलन् for चलः. A. D. अरुणशिशिर for अकरुणशशि. D. F. कान्तः क्लान्ताम् & G. क्लान्तक्लान्ताम्. A. om. विमृश्य. A. B. G. अनुकम्पया. A. मनः for चेतः.

18. A. B. om. स्वगतम्. A. B. आर्यस्य for अस्य. B. मनसि. B. G. जानकीयम्. C. F. समुन्मीलति.

20. B. adds आर्य before किम्.

21. B. सुमीतेन in place of पुत्रीम्. F. लङ्कायाः. A. कृतालयाम्. C. F.

दरीमनुवर्तितुं लङ्कायां कृतालयाच्चित्ररूपनाम्नो दानवात्सकलमिन्द्रजालकमाददानेन स्थितम् ।

22 लक्ष्मणः । नूनमयं कृतकर्णकौतुकामोदः कयोरपि विद्याधरयोः संवादः ।

23 पुनर्नेपथ्ये । सखे रत्नशेखर तन्मे धारयसि निजकलादर्शनमिति ।

24 पुनर्नेपथ्ये । वयस्य चम्पकापीड

अमुरसुरनिशाचरोरगाणा-
मपि नरकिंनरसिद्धचारणानाम् ।
सकलजनविलोकनैकचित्रं
स्फुटमिह कस्य विजृम्भतां चरित्रम् ॥ ९ ॥

अथवा किमन्येन । लङ्कानुभूतमेव नूतनं किमपि सरसरमणीयं चरितमुपदर्शयामि ते ।

25 लक्ष्मणः । आर्य इतोऽवधार्यताम् । नन्विदमयत्नोपनीतं प्रेक्षणीयम् ।

26 रामः । अनाकर्णितकेन ।

देवि त्वदीय मणिनूपरजृम्भमाण-
कोलाहलोत्तरलहंसकुलाकुलासु ।

सकलाम्. D. सकल. C. E. जालकलाम्. A. जालमादाय.

22. F. om. कृत. C. D. E. F. पथिकयोः for विद्याधरयोः.

23. A. तथा for तत् & कारयसि for धारयसि, or which F. has दर्शयसि.

24. C. E. °सुरभुजङ्गचारणानाम्. F. विजृम्भितम् & G. विजृम्भते. A. om. नूतनम्.

26. After the first two lines of the stanza A. has आर्य क पुनरिह गोदावरी कुत्र वैदेही & then रामः । विमृश्य । कथं मता &c. which is

वैदेहि लक्ष्मणपदाम्बुजलाञ्छितासु
गोदावरीपुलिनभूमिषु देहि दृष्टिम् ॥ १० ॥

27 लक्ष्मणः। आर्य क्व पुनरत्र वैदेही क्व वा गोदावरी।

28 रामः। विमृश्य। कथं प्रतारितोऽस्मि मतिविभ्रमेण। विचिन्त्य। अथ वा कृतार्थीकृतोऽस्मि। अनेन हि

गोदावरीतीरतपोवनेषु
सौमित्रिसीतापरिपूर्णपार्श्वः।
मुदा निमेषानिव यान्यनैषं
दिनानि तान्येव पुनः स्मृतानि ॥ ११ ॥

पुनः सप्रत्याशम्। अपि नाम

तान्येव पक्ष्मलदृशो वचनामृतानि
भूयोऽपि कर्णचुलुकैरहमापिबेयम्।
यैर्मामदर्शयदसौ विकसत्प्रमोदा
गोदावरीकमलवीचिविचेष्टितानि ॥ १२ ॥

29 नेपथ्ये।

तुह सुहअ उक्खिवन्ती तरङ्गसिअचामरं रहुमिअङ्क।

---

29 तव सुभग उत्क्षिपन्ती तरङ्गसितचामरं रघुमृगाङ्क।

---

followed by the last two lines of the stanza, after which, लक्ष्मणः। प्रतारितोस्मि मतिविभ्रमेण &c. *i. e.* speech 28. C. E. पदाङ्कितसैकतासु.

27. F. G. om. आर्य. A. B. F. G. इह for अत्र. A. गोदावरी क्व वैदेहीति. F. कुत्र for क्व. D. om. वा.

28. A. B. G. मे after हि. C. E. F. कृतानि for स्मृतानि. A. om. अपि नाम. D. F. G. विकच for विकसत्. A. F. प्रमोद.

29. C. E. उक्खिवइ. A. D. F. उक्खिवदि. A. °सीअ, & गोलावरी.

धअलकमलादपत्तं धारइ गोलाणई सहत्थेण ॥ १३ ॥

30 रामः । सहर्षम् । अये स एवायं प्रियतमायाः समालापः । तथा हि

परिमितकमनीयः कोमलो वाग्विलासः
सरसमधुरकाकुस्वीकृता कापि लेखा ।
ध्वनिरपि च विपञ्चीपञ्चमस्यानुवादी
श्रुतिरपि कलकण्ठीकण्ठसंवादमेति ॥ १४ ॥

तत्कुत्र पुनः प्रेयसी । विलोक्य । तत्कथमयमदृष्टचन्द्रलेखश्चन्द्रालोकः ।

ततः प्रविशति यथानिरूपयिष्यमाणा जानकी ।

31 रामः । ससंभ्रमम् । प्राप्तासि । इति गन्तुमिच्छति ।

32 लक्ष्मणः । रामं हस्ते धृत्वा । अलमिह संभ्रमेण । विद्याधरोपनीतमिन्द्रजालकं खल्वेतत् ।

33 रामः । निर्वर्ण्य । अये क एष संनिवेशविशेषः । तथा हि

एकेनालम्बितेयं शिथिलभुजलताशोभिनाशोकशाखा
हस्तेनान्येन चायं दिनकरकिरणक्लान्तकान्तिः कपोलः ।

धवलकमलातपत्रं धारयति गोदानदी स्वहस्तेन ॥

---

30. C. E. F. om. अये. C. E. वर्ती for वादी. A. हंसी for कण्ठी. C. D. E. F. कुतः for कुत्र. C. E. असौ after पुनः. C. D. E. F. om. अयम्. A. चन्द्रलोकः.

31. C. E. add इयं before प्राप्ता & om. असि.

32. A. om. रामम्. A. B. C. E. °जालम्. A. B. om. खलु.

33. D. G. शाखि for अशोक. B. D. F. तुहिनकर for करकिरण. C. D. E. लुलित & F. ललित for लुलसि. D. लक (?) for कण. A. °कणः. B. लक्ष्म for पक्ष्म. D. F. G. om.

एष स्रस्तो नितम्बे लुठति कचभरस्त्यक्तकाञ्चीकलापे
नेत्रोत्सङ्गे च बाष्पस्तबकनवकणैः पक्ष्मला पक्ष्मलेखा ॥ १९ ॥

पुनर्विभाव्य । नूनमियमशोकशाखां सखीमिवावलम्ब्य निद्रामुपगता । तथा हि

आमीलन्नवनीलनीरजतुलामालम्बते लोचनं
शैथिल्यं नवमल्लिकासहचरैरङ्गैरपि स्वीकृतम् ।

पुनर्विमृश्य । नूनमनया हृदयप्रमोददायी कोऽपि स्वप्नो दृष्टः । तथा हि

आलापादधरः स्फुरन्कलयति प्रेङ्खत्प्रवालोपमा-
मानन्दप्रभवाश्च बाष्पकणिका मुक्ताश्रियं बिभ्रति ॥ १६ ॥

34 सीता । उन्मील्य लोचने । हद्धि हद्धि । अण्णारिसो मे जीअलोओ ।

गोलाणई कहिं सा णीलुप्पलसामलो कहिं रामो ।
लङ्का कहिं कहिं वा हद्धी रामेक्कजीविदा सीदा ॥ १७ ॥

इति मूर्छति ।

---

34 हा धिक् हा धिक् । अन्यादृशो मे जीवलोकः ।

गोदानदी कुत्र सा नीलोत्पलश्यामलः कुत्र रामः ।
लङ्का कुत्र कुत्र वा हा धिग् रामैकजीविता सीता ॥

पुनर्विभाव्य & add शाखि after अशोक. D. G. उपागता. A. om. तथाहि. A. लोचने. A. B. C. E. om. कोऽपि. A. adds अपि after स्वप्नः. A. B. G. स्फुरत्. A. किसलय for कलयति & कपोल for प्रवाल & °प्रभावः (?).

34. A. om लोचने. A. B. om. मे. A. गोआवरी, & सो for सा. & adding सा after the first कहिं, om. कहिं ... मूर्छति. C. E. om. लङ्का कहिं. F. om. वा. C. E. repeat हद्धि.

रामः । अयि वसुधे

यां गर्भेण त्रिजगदबलारत्नभूतां दधाना
लब्धार्थत्वाज्जगति भवती रत्नगर्भा बभूव ।
तामुत्सङ्गे तव विलुठितां वीक्षमाणापि सीतां
द्राग्दीर्णासीर्न कथमथ वा देवि सर्वंसहासि ॥ १८ ॥

तदेनामभ्यर्थयामि तावदस्याः समुद्बोधनाय । अथ वा किमभ्यर्थनया ।

निजामपि सुतां सीतां नेयमुद्बोधयिष्यति ।
निजेऽप्यपत्ये करुणा कठिनप्रकृतेः कुतः ॥ १९ ॥

तदेनं तावदभ्यर्थयामि ।

स्निग्धाशोकद्रुम निजसखीं तूर्णमुद्बोधयैनां
सिक्त्वा सिक्त्वा किसलयकरस्रंसिना सीकरेण ।
एतस्याः किं नयनकमलस्यन्दिभिः सान्द्रसान्द्रै-
र्बाष्पोत्पीडैरनुदिनमपि त्वं न सिक्तालवालः ॥ २० ॥

कथमनाकर्णितकेन प्रत्याख्यातमनेन । अये कृतघ्नता पलाशिनः ।

विलोक्य । कथं प्रकृतिप्रियंवदाया मे प्रियायाः सखीजनोऽपि न कश्चिदिह ।

---

35. A. या for याम्. G. वै गर्भे for गर्भेण. C. D. E. F. लब्धान्वर्था. A. उत्सङ्गम्. G. विलुलिताम् & च for अपि. A. भग्ना for दीर्णा. A. B. G. आसीत्. A. अर्थयामि & एवम् for एनम्. D. सलिल for कमल. A. स्रंसिभिः for स्यन्दिभिः. B. त्वमसि यदहो किं for अनुदिनमपि त्वम्. D. असि for अपि. F. च for न. A. adds अयम् after कथम्. C. E. B. add एव after अनाकर्णितकेन. C. E. F. अकृतज्ञता for कृतघ्नता. F. om. मे. A. प्रियाया मे.

36 प्रविश्य त्रिजटा । सखि जानकि समाश्वसिहि समाश्वसिहि ।

37 सीता । समाश्वस्य । कहं पिअसही मे तिअडा ।

38 त्रिजटा । सखि अनया ते मधुरया मुखरेखया तर्कयामि यत्किल प्रियं किमपि दृष्टवती भवती ।

39 सीता । अत्थि दाणिं हि मए सिविणअम्मि सअं गोळाणईए सहत्थकळिदतरङ्गचामरधवळकमळादवत्ताए परिचरिज्जन्तो अज्जउत्तो दिट्ठो ।

40 त्रिजटा । तर्हि वर्धसे । सुखस्वप्नः खल्वसौ ।

41 सीता । हला केरिसो मे रामेकचित्ताए सिविणिअम्मि विस्सासो ।

42 त्रिजटा । तत्किं चिन्तास्वप्न इति संभावयासि । नहि नहि । चिन्तास्वप्नोऽपि नैवमचुम्बितावगाही भवति ।

---

37 कथं प्रियसखी मे त्रिजटा ।

39 अस्तीदानीं हि मया स्वप्ने स्वयं गोदानद्या स्वहस्तकलिततरङ्गचामरधवळकमलातपत्रया परिचर्यमाण आर्यपुत्रो दृष्टः ।

41 हला कीदृशो मे रामैकचित्तायाः स्वप्ने विश्वासः ।

---

36. All except A. B. om. सखि. A. om. जानकि.

37. F. मे पिअसही. A. om. तिअडा.

38. F. om. सखि. A. B. ते अनया. C. E. F. om. मधुरया. A. D. शोभया for रेखया. B. om. किल प्रियम्. F. किमपि प्रियम्. A. om. किमपि. B. adds कौतुकम् before दृष्टवती. A. D. om. भवती.

39. B. C. E. F. om. हि. A. B. om. सअं. A. om. गोळाणई. B. गोदाणई. A. D. add. सिद before चामर. B. adds परअज्जीए before परिचरिज्जन्तो. D. F. परिचन्दो. A. adds गोशवलीए before अज्जउत्तो.

41. G. om. हला.

42. A. adds स्वं स्थिता before चिन्ता°. B. om. नहि नहि. G. one नहि. A. B. C. E. इह for अपि. C. E. F. om. नैवम्.

43 सीता। किं उण अचुम्बिदम्।

44 त्रिजटा। यन्न संभाव्यते।

45 सीता।

जं ण हु संभावीअदि तं पि हला अत्थि अत्त लोअम्मि।
णं जीवइ जणअसुदा अपुलोअन्ती वि राममुहचन्दम्॥ २१॥

ता किं इमिणा सिविणएण जीविदेण वा। उवेक्किदह्मि अज्जउत्तेण।

46 रामः। शान्तं पापम्। अयि प्रिये हृदयस्थितापि मे कथमजानती वर्तसे हृदयवृत्तिम्।

47 सीता। अह वा किन्ति हरमुउडमिअङ्के कलङ्कमारोपइस्सम्। जाणामि अज्जवि अज्जउत्तो अकलिदवुत्तन्तो मे।

---

43 किं पुनरचुम्बितम्।

45 यन्नखलु संभाव्यते तदपि हला अस्त्यत्र लोके।
ननु जीवति जनकसुतानालोकयन्त्यपि राममुखचन्द्रम्॥
तत्किममुना स्वप्नेन जीवितेन वा। उपेक्षितास्म्यार्यपुत्रेण।

47 अथ वा किमिति हरमुकुटमृगाङ्के कलङ्कमारोपयिष्यामि। जानाम्यद्याप्यार्यपुत्रोऽकलितवृत्तान्तो मे।

---

44. A. न खलु for यन्न. F. adds से after संभाव्यते.

45. D. उण for ण हु. A. हला तंपि. B. दावएत्थ for अत्त. F. अभलोअम्मि for अत्थलोअम्मि. G. जं for णं. D. अवलोअन्ती. F. अ for वि. A. om. चन्द. G. °चन्दमुहम्. A. om. ता. C. E. सिविणे after which E. adds ता. A. om. जीविदेण...°उत्तेण.

46. A. F. repeat शान्तं पापम् & have हवि for हृदय. B. om. मे. B. F. इव before वर्तसे. B. मे after वर्तसे. A. D. °वृत्तम्.

47. C. E. वि after °मिअङ्के. A. आरोवस्सम्. A. B. om. अज्जउत्तो. G. अज्जउत्तो अज्जवि. A. B. अज्जउत्तो after मे.

48 रामः । प्रिये इदानीमुचितमनुसंदधासि ।

49 सीता । विमृश्य । कहं ।

50 नेपथ्ये । अये लङ्कानिवासिनः सावधानमवस्थीयताम् । नन्वितः

प्राकारमुन्नतमसीमबलो विलङ्घ्य
लङ्कामयं विशति कोऽपि कपिप्रवीरः ।

आकर्ण्य सर्वे त्रासं नाटयन्ति ।

51 पुनर्नेपथ्ये । अये लङ्काधिवासिनः अलं त्रासेन ।

तत्संमुखं प्रचलितः स्वयमक्षनामा
नन्वेष राक्षसपतेः कुपितः कुमारः ॥ २२ ॥

52 सीता । कहं उण सह महीहरेण वेवदि ण्ण असोअवणम् ।

53 त्रिजटा । विमृश्य ।

तुहिनकरमयूखैर्दीप्तकन्दर्पदर्प-
स्तपनकुलवधूटीं त्वामयं मुक्तलज्जः ।

---

49 कथम् ।

---

48. C. D. E. F. om. प्रिये. B. अये. C. E. अभि for अनु. A. °संदधामि.

49. B. कहं वा. C. E. वाआलेण णेऊररएण वि कहिदा णाहं णाहस्स.

50. B. उपैति किल for अयं विशति. C. E. have for the 2nd line प्राप्तोरुषारुणितवृक्कपिवीरउच्चैः & D. F. प्राप्तस्त्वराविहितरोषकपिप्रवीरः. G. has उभे & नाटयतः. F. D. उच्चैः before त्रासम्.

51. C. D. E. F. om. पुनर्नेपथ्ये. A. om. अधि. D. G. om. अये ... त्रासेन. B. D. G. प्रचलति.

52. G. महीअलेण. A B. add. इमं before वेवदि ण्ण & सअ before असोअ°.

53. B. मयूखैः & D. मयूखः. A.

अयमयमनुनेतुं रामचन्द्रैकचित्ता-
मपि स विपिनवीथीमेति लङ्काधिनाथः ॥ २३ ॥

54 सीता । त्रासं नाटयति ।

ततः प्रविशति रावणः ।

55 सीता । पराङ्मुखी तिष्ठति ।

56 रावणः । अयि जानकि

कन्दर्पज्वरवेदनापरिपतद्बाष्पस्रुतिक्षालितं
स्वर्गस्त्रीकुचकुम्भकुङ्कुमरजःस्त्येयापराधोज्ज्वलम् ।
एतत्त्वां सुरदन्तिदन्तशिखरोल्लेखाङ्कविख्यापित-
प्रस्फूर्जच्चतुरन्तविश्वविजयं वक्षःस्थलं याचते ॥ २४ ॥

57 सीता । अनाकर्णितकेन । अवि णाम पुणोवि रामचन्दमुहचन्दं पुलो-
वइस्सम् ।

58 त्रिजटा । सखि जानकि । एवंप्रलापिनि लङ्केश्वरे कर्णविधानमपि
तावद्देहि ।

59 रामः । साधु त्रिजटे । यत्प्रलाप इत्युक्तवत्यसि ।

60 रावणः ।

यत्संतुष्टवतः पुरा पुरभिदश्छेदोत्सवच्छेदिनो
न क्रोधादनमन्नवोद्गताशिरःश्रेणौ नमन्त्यामपि ।

---

57 अपि नाम पुनरपि रामचन्द्रमुखचन्द्रं विलोकयिष्यामि ।

°वधूटी. A. B. रामभद्रैक° & च for स. A. एष for एति. B. अधिराजः.
56. C. D. °क्षालित°. A. C. E. त्यक्त for स्तेय. A. अभि & E. उप-रोध for अपराध. A. om. एतत्... याचते, & विस्तृत for शिखर.
57. C. E. रामचन्द्रस्स.
58. All except A. B. om. सखि. C. E. om. जानकि. D. प्रलपति.
59. F. त्रिजटे. All except C. E. om. यत्. F. साधु for प्रलापः.
60. G. छन्द for छेद. F. D. ते for तत्.

एतत्ते दशमं शिरो मम नमस्त्वत्पादपाथोजयो-
र्व्याजं मिथिलेन्द्रपुत्रि भवतीं प्रेमातुरं याचते ॥ २५ ॥

61 सीता। संस्कृतमाश्रित्य।

निजे पाणौ कृत्वा बकुलव्रतिकाबालमुकुलं
ययोश्चक्रे गुञ्जन्मधुपमवतंसं रघुपतिः।
अपीमौ कर्णौ मे वचनमिदमाकर्ण्य न कथं
विशीर्णौ युक्तं वा चरितमिदमन्तःकुटिलयोः ॥ २६ ॥

62 रावणः। अयि जानकि अवलोकनमात्रेणापि तावन्मां संभावय।

63 सीता। अये निशाचर न तावत्प्रार्थनाभङ्गलाघवात्कथं राघवादपि न बिभेषि।

64 रावणः। अयि क एष राघवो नाम यं किल राम इति जनो जल्पति। विहस्य।

कामः कियानसिलतानिहितैकबाहु-
क्रीडार्दितत्रिभुवनस्य दशाननस्य।
रामस्तु केवलमयं सुमुखि त्वदर्थे
मां हन्ति हन्तु न चिरान्निशितैः शरौघैः ॥ २७ ॥

---

61. B. विदीर्णौ for विशीर्णौ.

63. All except A. G. have संस्कृतमाश्रित्य. G. अपि for अये. A. B. D. G. om. न. B. G. एतावत् for तावत्. A. om. कथम्. F. D. न राघवादपि.

64. D. om. अयि. G. अये. F. राघवनामा. D. om. नाम. A. F. अयम् for यम्. B. G. जनो राम इति &c. D. adds अयम् after जनः. C. E. put रावण after & D. before विहस्य. B. रामः for कामः. A. हसित & C. D. E. F. पिहित for निहित. D. °बाहुः. A. अर्जित for अर्दित. A. B. G. हन्त for हन्तु. C. E. चिरम् for चिरात्. B. असितैः for निशितैः.

65 सीता । सत्यमेवैतत् ।

66 रावणः । स्वगतम् । कथमन्यदेव किमप्युक्तवानस्मि । प्रकाशम् । तदेव विपरीतं पठित्वा । अयि जानकि तावन्मां जीवय नयनामृतेन ।

67 सीता ।

तदा त्वामपि लङ्केश विलोकयति जानकी ।

68 रावणः । सप्रत्याशम् । तत्कथय समयम् । अयं हि

मन्दोदरीमपि विमुञ्चति राज्यमेत-
दप्युन्मदं तव पदाब्जतले करोति ।
किं जल्पितेन बहुना सुमुखि त्वदर्थे
स्वानि च्छिनत्त्यपि शिरांसि पुनर्दशास्यः ॥ २८ ॥

69 सीता ।

यदि खद्योतभासापि समुन्मीलति पद्मिनी ॥ २९ ॥

70 रावणः । सक्रोधम् । आः पापे यावत्किल तपनखद्योतयोस्तावदन्तरं रामरावणयोः । तदियं हन्यसे । इति खड्गमुत्पाटयति

71 रामः । सकरुणम् ।

हा जानकि त्वमधुनासि कथं भवित्री

सविचिकित्सम् ।

---

65. C. E. add इममेव श्लोकं पठित्वा before सत्यम्. D. सत्यमेनम्.

66. D. एवम् for एव. G. om. प्रकाशम्. B. C. E. पठति. A. B. जीवय मां तावत्. G. संजीवय.

67. D. संस्कृतमाश्रित्य for सीता. A. B. लङ्केश्वर. B. F. G. विलोकयिष्यति. A. B. जानकीं विलोकय (A. यिष्य) ति.

68. A. B. G. उच्छिनत्ति.

69. D. संस्कृतमाश्रित्य after सीता. A. G. अपि for यदि.

70. B. प्रद्योतन for तपन. F. om. एव. D. तावत् & G. यत् for तत्. C. D. E. इह & B. इदम् for इयम्. A. न सहसे & D. मन्यसे for हन्यसे.

71. D. G. om. सकरुणम्. D. दीर्घोऽपि कः for धिग्दैवतम्. F. दैवकः.

धिग् दैवतं तव सुदारुण एष पाकः ।

सक्रोधम् ।

आः पाप राक्षसकुलाधम संहतोऽसि

ससंभ्रमम् ।

हे वत्स लक्ष्मण धनुर्धनुरेष कालः ॥ ३० ॥

72 लक्ष्मणः । आर्य किमिदमैन्द्रजालिकविलोकनादलीकमेव संभ्रम्यते ।

73 रावणः । अयि जानकि अयमसावुदीर्णकरवालः कालभुजङ्गः । तदिदानीमपि दशकण्ठभुजाश्लेषभेषजमनुजानीहि ।

74 सीता ।

विरम विरम रक्षः किं मुधा जल्पितेन
स्पृशति न हि मदीयं कण्ठसीमानमन्यः ।
रघुपतिभुजदण्डादुत्पलश्यामकान्ते-
र्दशमुख भवदीयान्निष्कृपाद्वा कृपाणात् ॥ ३१ ॥

75 रावणः । किमतः परं कालक्षेपेण । तदहमिदानीमस्याः कण्ठरुधिरेण कालिकामर्चयामि । इति खड्गधारां परामृशति ।

E. हम् (?) for सम्. A. B. D. G. हृतः for हतः. F. धनुधनुरेष (?)

72. D. F. om. आर्य. A. om. किम्. C. E. महेन्द्र.° D. F. G. °जालिक. A. संभ्रम्यसे.

73. D. F. om. अयि & जानकि & have करोदीर्ण°. G. adds कराल before करवालः. B. D. G. om. काल. D. भुजङ्गमः. B. C. E. दशमुख. A. B. G. °आश्लेषभेषजम्. F. आश्लेषसुखम्.

74. C. D. E. संस्कृतमाश्रित्य. A. वृथा. F. अल्पः for अन्यः. B. उज्ज्वल for उत्पल.

75. B. C. E. इहमिदानीम् (?) C. E. एतस्याः. A. अर्चयिष्यामि.

76 रामः । अहह

विधिरकरुणः स्फीतं स्फीतं तपः परिजृम्भते
जलधिसलिले मग्नं विश्वं युगं परिवर्तते ।
कुवलयदलस्रक्संश्लेषोत्सवैकपदे पदं
यदयमदयः सीताकण्ठे करोति कृपाणकः ॥ ३३ ॥

पुनर्विभाव्य ।

चान्द्रीं लेखां दशति दशनैर्दारुणः सैंहिकेयो
नव्यां वल्लीं दवदहनकश्चन्दनीं दन्दहीति ।
अप्युन्मत्तः कुवलयमयीं मालिकामालुनीते
मूलादुन्मूलयति नलिनीं दुष्टहस्ती करेण ॥ ३४ ॥

77 सीता ।

चन्द्रहास हर मे परितापं
रामचन्द्रविरहानलजातम् ।
त्वं हि कान्तिजितमौक्तिकचूर्णं
धारया वहसि शीतलमम्भः ॥ ३५ ॥

78 रावणः । कः कोऽत्र भोः । सत्वरं मे करतले कपालपात्रमर्प्यतां येनास्याः कण्ठरुधिरं प्रतीच्छामि । इत्यशोकाविटपान्तराले हस्तं प्रसार्य । कथं न्यस्तमेव केनापि मम करतले कपालम् । विलोक्य सचमत्कारम् । अये न कपालमेतत् । किं त्वशस्त्रच्छिन्नं

---

76. G. om. युगम्. A. मग्न for दल. C. E. परम् for पदम्. G. सत् for यत्. D. विमृश्य for विभाव्य. A. संलुनीते.
77. F. अन्तः for अम्भः
78. D. F. G. मम. B. C. F. G. करे. G. अर्पताम् (?). F. एतत् for येन. A. कथमपि. A. B. G. om. केनापि. F. मत् for मम. D. om. कर. D. F. om. अये. B. adds इदानीमेव after किंतु & कथम् be:

शिर एव कस्यापि । विमृश्य । कस्य पुनरिदम् । नूनमक्षकुमारस्य । इति मूर्छितः पतति ।

79 त्रिजटा । अयि लङ्केश्वर समाश्वासिहि समाश्वासिहि ।

80 रावणः । समाश्वस्य । नूनमिदं तस्यैव दुष्टकपेर्विजृम्भितम् । तेन तमेव तावदग्रतः पातयामि । इति निष्क्रान्तः ।

81 रामलक्ष्मणौ । अहो संविधानवैदग्धी ।

82 त्रिजटा । सीतामालिङ्ग्य । सखि पुण्येन जीवितासि ।

83 सीता । अपुण्णेणेति भणिदव्वम् ।

84 त्रिजटा । कथमिव ।

85 सीता । कहं उण तं अपुण्णं ण होइ । जं किर रामचन्दविरहतावणिव्वावणीए चन्दहासधाराए उवेक्खिदाह्मि । ता किं इमिणा जीविदेण । इह दारुसञ्चअम्मि अग्गिं पज्जालेहि जत्थ इमाइं अङ्गाइं सीदलम्मि ।

---

83 अपुण्येनेति भणितव्यम् ।

85 कथं पुनस्तदपुण्यं न भवति । यत्किल रामचन्द्रविरहतापनिर्वापणया चन्द्रहासधारयोपेक्षितास्मि । तत्किमनेन जीवितेन । इह दारुसंचयेऽग्निं प्रज्वालय यत्रेमान्यङ्गानि शीतलयामि ।

---

fore नूनम्. A. कथम् for नूनम्. F. मत् for अक्ष. F. D. मूर्छति.

79. D. लङ्केश. B. om. one समाश्वासिहि.

80. F. D. अस्य for तस्य. D. F. G. om. एव. D. F. om. दुष्ट. D. तवेनम् for तेन तम्. F. तेन मे तावत्. A. B. अग्रे. F. adds तम् after अग्रतः. A. घातयामि.

81. C. E. °वैदग्ध्यम्.

82. D. om. सीताम्. C. D. E. समालिङ्ग्य. B. निर्वर्ण्य for सीतामालिङ्ग्य. A. B. C. जीवसि.

83. A. D. भाणिज्जम्. B. भणिज्जइ. G. भणिज्ज.

85. D. F. om. तम्. D. om. जीविदेण & has चारु for दारु. B. °सञ्चएण. C. F. सीदलइस्सम्.

86 त्रिजटा। शान्तं पापम्। नन्वचिरादेव निजाङ्ककानाम्

हिमकरकिरणकरम्बितमरकतमयपीनपट्टकप्रतिमे।
मलयजपरागसरसे रामोरसि तापमपहरसि॥ ३६॥

87 सीता। हला किं इमिणा अलीअजप्पिदेण। सच्चं जेव्व अणलपवेसम्मि ववसिदम्हि। ता उवणेहि मे अङ्गालखण्डअम्।

88 रामः। हन्त भोः कथमपि शार्दूलमुखान्मुक्तायाः पुनरपि शबरवागुरामवतीर्णायाः कुरङ्गवध्वा भङ्गीमङ्गीकृतवती जानकी।

89 त्रिजटा। निर्गत्य प्रविश्य च। सखि असुलभानलोऽयं प्रदेशः।

90 रामः। सहर्षम्। त्रिजटे दिष्ट्या रक्षितस्त्वया रामः।

91 सीता। संस्कृतमाश्रित्याशोकवृक्षं प्रति।

कुरु सकरुणं चेतः श्रीमन्नशोकवनस्पते
दहनकणिकामेकां तावन्मम प्रकटीकुरु।

---

87 हला किमनेनालीकजल्पितेन। सत्यमेवानलप्रवेशे व्यवसितास्मि। तदुपनय मेऽङ्गारखण्डकम्।

91 हला प्रेक्षस्व प्रेक्षस्व। निपतितं तावदस्य शिखरादङ्गारखण्डकम्।

---

86. A. F. repeat शान्तं पापम्. A. om. मय. D. °प्रकटे for प्रतिमे. D. सरसि & G. रजसि for सरसे.

87. G. सच्चम् for सच्चम्. A. B. G. °पवेसे. A. B. वसिदह्मि & C. E. विवसदह्मि. C. उवणोंह (?) C. E. अणल°.

88. C. D. E. F. om. शबर. B. भङ्गनायाम् for वध्वाः.

89. D. F. G. om. सखि. B. अयि for सखि. B. G. सुलभा°.

90. A. om. सहर्षम्. A. has त्वया रक्षितो रामः. D. ते for त्वया.

91. A. अशोकं प्रति & B. अशोकवृक्षं प्रति before संस्कृतम् &c. D. अशोकं प्रति. D. F. G. अलमकरुणम्. B. नमोऽस्तु ते for वनस्पते. A. मम for नव. C. E. F. °ध्याजाम्. B. C.

ननु विरहिणां संतापाय स्फुटीकुरुते भवान्
नवकिसलयश्रेणिव्याजात्कृशानुशिखावलिम् ॥ ३७ ॥

विलोक्य सहर्षम् । हला पेक्ख पेक्ख निवडिदं दाव अस्स सिहरादो अङ्गालखण्डअम् । इत्युपसृत्य ग्रहीतुमिच्छति ।

92 रामः ।

अये कथमशोकोऽपि ममायं शोकतां गतः ।

93 लक्ष्मणः । आर्य अनुपपन्नमिदं यत्किल तरुशिखरमङ्गारकमुद्गिरतीति ।

94 रामः ।

किं नोपपादयेद्वत्स रामस्य विधिवैधुरी ॥ ३८ ॥

95 सीता । अङ्गारखण्डं हस्तेनादत्ते ।

96 रामः ।

अनल नलिनकोमले करेऽस्याः
स्फुरदरुणोत्पलकुड्मलोपमः स्याः ।

विमृश्य ।

चरितमुचितमस्ति वा कुतस्ते
ननु भुवने विदितोऽसि कृष्णवर्त्मा ॥ ३९ ॥

D. E. om. one पेक्ख. A. G. इमस्स for अस्स. C. E. °खण्डम्.
92. B. C. E. om. अयम्. B. शोकत्वम् & D. शोकरताम्. F. शोकरः सङ्कुलः.
93. A. B. G. अङ्गारखण्डकम्. A. °खण्डम्. B. G. om. इति.
94. D. अये before किम्. B. G. न संपादयेत्. D. om. स्य in रामस्य.
96. A. कुड्मलोपमा. All except D. G. om. विमृश्य.

97 सीता । हस्ते गृहीत्वा सविषादम् । कहं मह अपुण्णेण अग्गीवि सीअलो संवुत्तो । निपुणं निरूप्य सचमत्कारम् । अये अङ्गाळखण्डअं ण हु एदं । अवि उण पम्मराअरअणखण्डअम् ।

98 त्रिजटा । अये पुण्यवतामग्निरेव रत्नं भवतीति प्रवादः सत्य एव संवृत्तः ।

99 सीता । पुनर्विलोक्य । कहं सा इमा रअणमुद्दिआ ।

पुनः संस्कृतमाश्रित्य ।

या शैशवावधि मनोरमरामचन्द्र-
हस्ताङ्गुलिप्रणयिनी सुभगा सुवृत्ता ।
अन्येव सा जनकराजसुता कथं नु
लङ्कामुपागतवती मणिमुद्रिकेयम् ॥ ४० ॥

पुनः सादरं कराङ्गुलिकिसलयेन लालयन्ती । अये रअणङ्गुलीअ अवि दाव कुसलं सलक्कणाणं रामचन्दचलणाणम् ।

---

97 कथं ममापुण्येनाग्निरपि शीतलः संवृत्तः । अये अङ्गारखण्डकं न खल्वेतत् । अपि पुनः पद्मरागरत्नखण्डम् ।

99 कथं सेयं रत्नमुद्रिका । अये रत्नाङ्गुलीय अपि तावत्कुशलं सलक्ष्मणयो रामचन्द्रचरणयोः ।

---

97. A. B. om. हस्ते गृहीत्वा. A. B. C. E. om. सविषादम्. C. E. put कहं before अग्गी. A. पुण्णेण. C. D. अङ्गालखण्डअ. A. B. C. E. इमं for एदं. C. E. om. रअण.

98. A. om. this speech. B. आयि सखि for अये.

99. A. om. पुनर्विलोक्य. A. B. एसा for सा इमा. D. F. G. have मुद्रिकां प्रति after आश्रित्य. A. शैशवाद्रतिमनोहर &c. B. सुलभा for सुभगा. A. च वृत्ता for सुवृत्ता. C. E. तु for नु. A. मुद्रिके स्वम्. C. D. E. अङ्गुलीअअ. B. om. दाव. B. रामदेव.

100 पटाक्षेपेण प्रविश्य हनूमान्। कुशलं देवि कुशलम्।

101 सीता। अमिअमुह कोऽसि तुमम्।

102 हनू०।

तारापतेरनुचरो रघुनन्दनस्य
दूतः सुतोऽस्मि मरुतः प्रथितो हनूमान्।
त्वां हन्तुमुद्यतवतो दशकन्धरस्य
न्यस्तं करे निभृतमक्षशिरो मयैव ॥ ४१ ॥

103 रामः। अहो कथमिदं हनूमन्नामधेयस्य मद्भागधेयस्य विलसितमेतत्।

104 लक्ष्मणः। अहो सचमत्कारता संविधानस्य।

105 सीता। अयि भद्दमुह को उण इमो तारावई।

106 हनू०।

यो वालिनः शौर्यनिधेरमित्र-
स्त्रैलोक्यबन्धोस्तपनस्य सूनुः।
रामस्य पादाब्जतलाभिवर्ती
सुग्रीवनामा कपिचक्रवर्ती ॥ ४२ ॥

---

101 अमृतमुख कोऽसि त्वम्।
105 अयि भद्रमुख कः पुनरयं तारापतिः।

---

100. C. E. प्रविश्य पटाक्षेपेण.

101. A. इमाहिं before अमिह°. F. अयि भद्दमुह.

102. A. दूतोऽस्मि मारुतसुतः.

103. A. om. अहो. D. F. हनूमान्. A. नामधेयं ... भागधेयम्. बान्धवस्य for भागधेयस्य. A. विलसित. B. C. E. om. एतत्.

104. B. C. E. सस्मितम् before अहो.

105. A. B. एसो for इमो.

106. G. अमित्रम्. A. B. F. पुत्रः for सूनुः. A. अग्रवर्ती & B. C. E. अनुवर्ती.

107 सीता । केण उण णरवाणराणं एरिसं सक्खित्तणं णिम्मिदम् ।

108 हनू० । रामबाणेनैव

वालिने विसृजता धनुरङ्कं
नाकलोककलनाकुचकेलिः ।
तारया सममदीयत चास्मै
वानरेन्द्रपदवीमणिमौलिः ॥ ४३ ॥

109 सीता । कहेहि दाव । अवि णाम मह मन्दभाइणीए किदे दुब्बलो दाणिं किंपि रहुणाहो ।

110 हनू० । किमपीति किमुच्यते । इदानीं हि

बहुलपक्षशशीव दिने दिने
रघुपतिः कृशतामुपयाति सः ।

111 सीता । हद्धि हद्धि ।

112 हनू० ।

कुवलयप्रतिमा द्युतिरस्य तु
प्रविकसत्यनुभाववशंवदा ॥ ४४ ॥

---

107 केन पुनर्नरवानराणामीदृशं सखित्वं निर्मितम् ।

109 कथय तावत् । अपि नाम मम मन्दभागिन्याः कृते दुर्बल इदानीं किमपि रघुनाथः ।

111 हा धिक् हा धिक् ।

---

108. A. चापेन for बाणेन. B. C. E तेन हि before वालिने. B. कुच-केल्या.

109. A. कहं & B. कहेसु for कहेहि. A. B. मन्दभाइणीए मह. D. F. किंपि दाणिम्. A. किं ति.

110. A. has देवि त्वद्विरहेण परितप्यते रामः for किमपीति...हनूमान् (112). D. F. अयि देवि before किमपि. B. दिने दिने°ग्रहरहः:.

111. C. E. have one हद्धि only.

112. A. कुवलयद्युतिमद्युति &c. B. G. °प्रतिमद्युति.

113 सीता। दाणिं किंपि उज्जीविदह्मि ।

114 हनू०। अयि देवि आकर्णय तावद्यत्संदिष्टं देवेन देव्याः ।

हिमांशुश्चण्डांशुर्नवजलधरो दावदहनः
सरिद्वीचीवातः कुपितफणिनिश्वासपवनः ।
नवा मल्ली भल्ली कुवलयवनं कुन्तगहनं
मम त्वद्विश्लेषात्सुमुखि विपरीतं जगदिदम् ॥ ४५ ॥

अपि च ।

कस्याख्याय व्यतिकरमिमं मुक्तदुःखो भवेयं
को जानीते निभृतमुभयोरावयोः स्नेहसारम् ।
जानात्येकं शशधरमुखि प्रेमतत्त्वं मनो मे
त्वामेवैतच्चिरमनुगतं तत्प्रिये किं करोमि ॥ ४६ ॥

115 सीता। लज्जते ।

116 त्रिजटा। सखि त्वमपि रघुपतेः किमपि प्रतिसंदेशं प्रत्यभिज्ञानं च समर्पय ।

---

113 इदानीं किमप्युज्जीवितास्मि ।

---

113. D. पि. after दाणिम्.

114. B. यथा for यत्. D. F. तु after यत्. B. C. D. E. F. आदिष्टम् for संदिष्टम्. Between देव्याः & हिमांशुः &c. F. has सीता। कहेहि दाव। हनूमान्. C. E. भवति जलदः for नवजलधरः & फूत्कार for निश्वास. A. B. अपि for इदम्. D. om. अपि च & अहम् for इमम्; B. इदम् for the same. C. E. अनयोः for उभयोः, C. E. F. वल्लभे for आवयोः. C. E. प्रेम for स्नेह.

116. A. किमपि रघुपतेः.

117 सीता । इमो मे पडिसंदेसो ।

बहलगलन्तणअणजलणिब्भरपज्जाउलावि मह दिट्ठी ।
तुह सुहअ वअणससहरलावण्णरसं पिपासेदि ॥ ४७ ॥

चूडारत्नमाकृष्य हनूमतः करे समर्पयन्ती । अयि चूडारअण

पच्छालअ णिअमङ्गं रअणीअरदिट्ठिपंसुपंसुलिअम् ।
रहुवइपअणिम्मलणहरअणीअरजोह्णणिअरम्मि ॥ ४८ ॥

118 हनू० । देवि अनुजानीहि । त्वरयति मां रामचन्द्रचरणदर्शनोत्कण्ठा ।

119 सीता । सबाष्पगद्गदम् । अयि अकारणसिणिद्ध पडिगते तुम्मि पुणोवि को मह कहिस्सदि रहुणाहस्स पउत्तिम् ।

120 हनू० । अयि देवि दिष्टया स्मारितोऽस्मि । नन्विदं ते संदिष्टं देवेन देव्याः ।

117 अयं मे प्रतिसंदेशः ।

बहलगलन्नयनजलनिर्भरपर्याकुलापि मम दृष्टिः ।
तव सुभग वदनशशधरलावण्यरसं पिपासति ॥

अयि चूडारत्न

प्रक्षालय निजमङ्गं रजनीचरदृष्टिपांसुपांसुलितम् ।
रघुपतिपदनिर्मलनखरजनीकरज्योत्स्नानिकरे ॥

119 अयि अकारणस्निग्ध प्रतिगते त्वयि पुनरपि को मम कथयिष्यति रघुनाथस्य प्रवृत्तिम् ।

117. B. G. विच्छालअ. A. पस्स for पंसु. C. D. A. G. जोह्णणीर.
118. C. D. E. F. have माम् after अनुजानीहि & मे (F. हि मे) after त्वरयति. D. om. चरण.

119. B. अये, & पि after तुम्मि. C. E. वि after को & have रहुणाहप्पउत्तिम्.
120. B. om. ननु & देव्याः. C. D. E. F. देवेनैव सं (D. F. अं)

मा ताम्य तामरसपत्रविशालनेत्रे
विल्याप्यते पुनरपि त्वयि मत्प्रवृत्तिः ।
सौमित्रिकार्मुकगुणध्वनिभिर्गभीरै-
स्तैः किं च राक्षसवधूरुदितैरधीरैः ॥ ४९ ॥

121 नेपथ्ये ।

हत्वा कथंचिदपि राजकुमारमक्षं
रे वानरापसद कुत्र पलायितोऽसि ।
त्वां हन्तुमिच्छति दशाननशासनेन
दर्पोद्धतो धृतधनुर्ननु मेघनादः ॥ ५० ॥

122 हनू॰ । देवि कृतकार्योऽस्मि । तदलमतःपरमात्मापलापेन । तदिदं प्रणम्यसे आपृच्छ्यसे च ।

123 सीता । अयि पवणणन्दण अणाआसेण इमं दुट्ठणिसाअरसाअरं अदिक्कमेहि ।

124 हनू॰ । अयं मूर्ध्नि गृहीतो देव्याः प्रसादः । इति निष्क्रान्तः ।

125 सीता । हला तिअडे खेअरीभविअ पेक्ख दाव इमस्स उत्तन्तम् ।

---

123 अयि पवननन्दन अनायासेनेमं दुष्टनिशाचरसागरमतिक्रमस्व ।
125 हला त्रिजटे खेचरीभूत्वा प्रेक्षस्व तावदस्य वृत्तान्तम् ।

विष्टं देव्याः for ते...देव्याः. B. ताम्य. C. E. F. विज्ञाप्यते. B. मे for मत्. A. D. गभीरैः for अधीरैः.

122. C. E. om. इदम्.

123. A. G. अये. B. has अणाआसेण at the end of the sentence instead of after णन्दण. A. दुग्ग for दुट्ठ. G. दुग्गिसाअर. C. E. F. णिसाअरणअरं साअरं अ.

124. D. om. मूर्ध्नि. D. अस्मि & F. अस्ति after गृहीतः.

125. D. इमं दाव after दाव.

126 त्रिजटा । तथा । इति निष्क्रान्ता ।

127 नेपथ्ये ।

बाणौघानेष वीरः कवलयति रुषा मेघनादेन मुक्तान्

128 सर्वे । हर्षं नाटयन्ति ।

129 पुनर्नेपथ्ये ।

बद्धोऽयं राक्षसेन ज्वलदनलशिखादीप्तपुच्छः कृतश्च ।

130 सर्वे । विषादं नाटयन्ति ।

131 पुनर्नेपथ्ये ।

क्रामन्नट्टालकानामुपरि कृतपदो निर्दहत्येष लङ्काम्

132 सर्वे । हर्षविषादौ नाटयन्ति ।

133 पुनर्नेपथ्ये ।

अक्रान्तोऽयं पयोधेः पयांसि शमयति स्वाङ्गलग्नं कृशानुम् ॥९१॥

134 सर्वे । हर्षं नाटयन्ति ।

135 पुनर्नेपथ्ये । अहो आश्चर्यमाश्चर्यम् ।

वेलाद्रेरस्य हेलाक्रमणपरिणतस्तुङ्गमाक्रम्य शृङ्गं
मौलिं पूर्वाचलस्य द्युमणिरिव नभो लङ्घयत्यम्बुराशिम् ।

---

126. C. D. E. F. एवमस्तु for तथा. C. E. पश्यति for निष्क्रान्ता.

127. B. G. एकवीरः. B. C. E, G. कलयति च.

129. B. G. om. पुनः.

130. D. हर्षविषादौ.

131. D. om. पुनर्नेपथ्ये. F. om. पुनः. F. क्रान्त्वा च. A. B. D. अट्टालकान्ताङ्गुलशिखरभुवः. C. E. F. शाहयामास & G. वन्वहीति. D. एव for एष.

133. F. om. पुनः. A. D. F. आक्रान्तः & C. E. आः क्लिष्टः for आक्रान्तः. A. पयोधिः. C. E. F. स्वाङ्गशीतम्.

134. D. omits this.

135. D. om. पुनर्नेपथ्ये. C. E. अत्यद्भुतं वर्तते & D. F. अद्भुतम् for

वेगप्रोद्भूतवातप्रतिहतसलिलोन्मुक्तगम्भीरगर्भ-
व्यक्तीभूतोरगेन्द्रस्तुतिशतविकसत्कीर्तिहारो हनूमान् ॥ १२ ॥

136 सीता । नेपथ्याभिमुखमवलोक्य । हला तिअडे अवतिण्णासि महीअलं । ता पिअंवदाए तुह आलिङ्गेमि अङ्गाइं । इति निष्क्रान्ता ।

137 रामः । प्रिये मामपि प्रतीक्षस्व ।

138 लक्ष्मणः । आर्य किमिति लङ्कावृत्तान्तानुकारिणि विद्याधरप्रणीते महेन्द्रजाले पुनःपुनरपि संभ्रम्यते ।

139 रामः । तर्हि दिष्ट्यास्माभिर्निजविक्रमकथनपराङ्मुखस्यापि हनूमतश्चरितरहस्यमाकलितम् ।

140 नेपथ्ये । अये रघुनाथ अयमसौ

दर्पोद्धतं दधिमुखं तरसा निपीड्य
पीत्वा चिरं मधुवने सरसं मधूनि

---

136 हला त्रिजटे अवतीर्णासि महीतलम् । तत्प्रियंवदायास्तवालिङ्गाम्यङ्गानि ।

आश्चर्यमाश्चर्यम्. C. परिणमन्. B. पात for वात. A. °गर्भैः.

136. D. अवतिण्णामि; & has पिअंवदा आलिङ्गेमि &c. C. G. निष्क्रान्ताः.

137. A. D. ममापि.

138. B. om. आर्य. All except B. have किमिदम्. D. वृत्त for वृत्तान्त. A. G. अनुसारिणि. A. C. E. °प्रणीतमहेन्द्र°. A. G. om. पुनरपि. C. E. विभ्राम्यते. D. भ्राम्यते. B. F. भ्रम्यते.

139. B. G. कथा for कथन. B. om. अपि. C. D. E. F. चरितमाकलितरहस्यम्.

140. C. D. E. F. अयि. A.

द्रष्टुं समेति भवतः पदपद्मलीलां
नीलाङ्गदप्रभृतिभिः सहितो हनूमान् ॥ १२ ॥

141 रामः । वत्स आकर्णितम् । तदागच्छ कृतकार्यं हनूमन्तं प्रत्युद्गच्छावः ।

इति निष्क्रान्ताः सर्वे ।

इति षष्ठोऽङ्कः ।

कोपोद्धतः & चरम् for चिरम्. A. D. सरसा & B. G. स्वरसम् for सरसम्.

141. B. अये instead of & C. D. E. F. अपि after वत्स. D. कृतवीर्यम्. A. प्रत्यागच्छावः.

॥ सप्तमोऽङ्कः ॥

1 ततः प्रविशति पुलस्त्यशिष्यः । परितो विलोक्य । अपरिशीलितसंनिवेशोऽस्मि । तत्कथं पृच्छामि तस्य भवनम् । पुनर्विलोक्य । कथमयं लङ्केश्वरमातामहस्य महामन्त्रिणो माल्यवतः परिचारकः करालकः । उच्चैः । सखे करालक इत इतः ।

2 प्रविश्य करालकः । मुने प्रणम्यते ।

3 मुनिः । समीहितं लभस्व । कथय तावन्मे बिभीषणस्य भवनम् ।

4 करा० । किं तत्र ।

5 मुनिः । आदिष्टोऽस्मि भगवता पुलस्त्येन कमपि संदेशमुपनेतुं कनिष्ठपौलस्त्यस्य ।

6 करा० । न तावदिदानीमिह बिभीषणः ।

7 मुनिः । कथय किमेतत् ।

8 करा० । एकदाभिप्रणमतो बिभीषणस्य करात्सकौतुकं लिखिताक्षरपङ्क्तिपत्रमेकं गृहीतं लङ्केश्वरेण वाचितं च ।

---

1. D. पुरः for परितः. C. D. E. अवलोक्य. D. कम् for कथम्. A. om. तस्य & has भुवनम्. A. B. G. have लङ्केश्वरमहामान्त्रिणः. D. om. महा. C. E. om. करालकः. A. om. सखे. D. om. करालक. F. अये for सखे करालक. B. has one इतः.

2. A. om. प्रविश्य.

4. C. E, F. ततः & D. तत्.

5. C. E. put कनिष्ठपौलस्त्यस्य before कमपि. A. D. किम् & F. कथम for कम्. A. अनुनेतुम्. A. B. कनिष्ठपौलस्त्य & G. पौलस्त्य only.

6. A. om. इदानीम्.

8. D. F. कदापि हि for एकदाभि°. A. फल & B. G. भूर्ति for शुद्धि. A. न परि° & C. D. E. F. खलु न. A. reads चतुर्थी...पट्टिका as the first

उदर्कशुद्धिमिच्छद्भिः सद्भिर्न खलु दृश्यते ।
चतुर्थीचन्द्रलेखेव परस्त्रीभालपट्टिका ॥ १ ॥

9 मुनिः । अहो प्रभुविज्ञप्तिचातुरी बिभीषणस्य । ततस्ततः ।

10 करा० । ततो विहस्य लङ्केश्वरेणोक्तम् । नूनं केनापि भीरुणा भाषितमेतत् । ख्यातं हि यत्किल

परस्त्रीकुचकुम्भेषु कुम्भेषु परदन्तिनाम् ।
निपतन्ति न भीरूणां दृष्टयः शरवृष्टयः॥ २ ॥

11 मुनिः । अहो निजचित्तवृत्तिभित्तिभूमिकानुसारीणि वाक्चित्राणि लोकस्य ।

12 करा० । ततः सप्रणयकोपविषादमिदमाह लङ्केश्वरं बिभीषणः ।

यस्य त्र्यम्बकमौलिखेलदमलस्वर्लोककल्लोलिनी-
